श्रीः

कर्पूरस्तवराजः।

भगवता श्रीमहाकालेन प्रणीतः

अज्ञातनामधेयेन केनचिद्विदुषा कृतेन
व्याख्यानयुगलेन श्रीताराकर्पूर-
स्तोत्रेण च समलङ्कृतः

स च

सूर्यपुरस्थेन ज्योतिर्विदा कृष्णशंकर केशव-
रामेण सम्पाद्य संशोधितः

मुम्बय्यां

पाण्डुरङ्ग जावजी इत्येतैः
स्वीये "निर्णयसागरमुद्रणालये" मुद्रापयित्वा
प्रकाशिता।

प्रतयः १०००.

शकाब्दाः १८५७, सन १९३५.

मूल्यं ३ आणकाः.

Publisher :-Pandurang Jawaji, } 'Nirnaya-sagar' Press,
Printer :-Ramchandra Yesu Shedge. } 26-28, Kolbhat Lane, Bombay.

प्रस्तावना.

को न जानाति जगतीतले यत्परमकारुणिको भगवान् वैदिकसनातनधर्मरक्षार्थे समयानुसारेण विविधानि पुंरूपाणि धृत्वा स्वभक्तरक्षणपूर्वं सनातनधर्मं परिरक्षतीति, तथैव कदाचिद् योषिद्रूपाण्यंगीकृत्य लोकोत्तराणि कर्माणि करोतीति सार्वजनीनम्, अतएवोक्तं केनचित् "इह जगति द्वे तत्त्वे, पुरुषतत्त्वं, प्रकृतितत्त्वं च, तत्र पुरुषतत्त्वमात्रस्य तृप्तिस्तु पुरुषसूक्तेन । प्रकृतितत्त्वमात्रस्य तृप्तिस्तु सप्तशतीपाठेनेति" पुंरूपाणि रामकृष्णादीनि यथा सुप्रसिद्धानि, तथा स्त्रीरूपाण्यपि दशमहाविद्या(काली-तारा)प्रभृतिरूपेण प्रसिद्धतमानि,तत्रापि प्रथमाया माहात्म्यं भैरवीतंत्र-कालीविलासतंत्र-महाकालसंहितादिषु विस्तरतो वर्णितं विद्वज्जनवेद्यम् । तदेतत्साम्प्रतं "गोरखपुर-कल्याणमासिक, शक्तिअंक, भाग ९ अंक १–२ दशमहाविद्या-इतिशीर्षके लेखे पं० मोतीलालशर्मणा शतपथब्राह्मणसंपादकेन हिन्दीभाषायां—कथं महाकालीति नामनिर्देशः, कथं च मुण्डमालाधारणं, शवरूपशिवासनञ्च कथमित्यादि शंकासमाधानपूर्वं प्रपञ्चितम् । तथापि किञ्चिदत्र लिख्यते—

दमनं कालियस्यापि यमलार्जुनभंजनम् ।
भञ्जनं शकटस्यापि तृणावर्तवधस्तथा ॥
बककेशिविनाशश्च पर्वतस्य च धारणम् ।
दावानलस्य पानं च यद्यदन्यं शुचिस्मिते !

कृष्णस्य परमेशानि ! यद्यत्कृत्यं वरानने !
तत्सर्वं परमेशानि ! कालिकायाः प्रसादतः ॥

इत्यार्यसंप्रदायप्रदर्शकगायत्रीभाष्ये पूर्वार्धे प्रथमप्रकरणे, तस्याश्च भगवत्याः परमकारुणिकायाश्चोपासनाप्रकारोऽपि कालीतंत्रादिषु स्पष्टीकृतो दृश्यते च, भगवता श्रीमहाकालेनापि विरचितः कर्पूरस्तवराजोऽपि कलिकल्मषोन्मूलनकर्त्र्याः कालिकाया विविधतांत्रिकप्रयोगप्रदर्शपूर्वकः स्तुतिरूपो विजयते, तस्योपरि बह्वयष्टीकाः सन्ति काश्चन मुद्रिताश्च वर्तंते। कलिकातातो मुद्रिते तांत्रिकटेक्स्ट्पुस्तकेऽस्य प्रथमश्लोकटीकायां प्रथमबीजोद्धारमाहात्म्यं टीकाकृता चेत्थं वर्णितम्—इस्लामधर्मावलंबिनः

साधका मोक्षकामनया आरबीयभाषया रूपांतरितं
"करीम्" इति मंत्रं जपन्ति । खृष्टानधर्मावलंबिनस्तु
"क्राइष्ट" इति मंत्रं जपन्ति
"कलौ काली कलौ काली कलौ काली न संशयः"

इत्यादिबहुविधमाहात्म्यवत्या भगवत्याः कालिकायाः कर्पूरस्तवराजस्य व्याख्यानयुगलमज्ञातनामधेयेन केनचिद्विदुषा कृतमस्ति । तत्र च प्रथमा समासबोधिनी केवलं श्लोकार्थं समासं च विशदयति ॥ द्वितीया च सारबोधिनी श्लोकार्थं समासबहुलैः पर्यायवाचकशब्दैः स्फुटीकुर्वती शास्त्रार्थमपि कुत्रचित् प्रदर्शयति, अत इदं व्याख्यानयुगलं यथामति संशोध्य मुद्रणार्थं निर्णयसागरयंत्रालयाधिपतये श्रेष्ठिवर्याय गोब्राह्मणप्रतिपालकाय श्रीयुतपाण्डुरङ्गजावजी महोदयाय प्रायच्छम् । तेन च यथावकाशं संमुद्य प्रसिद्धिं नीतम् । तच्च विद्वज्जनमानससन्तोषकरमवश्यं भविष्यतीति विदुषां वशंवदो ज्योतिषी

कृष्णशंकरकेशवरामरैक्वः ।

अनुक्रमणिका ।

श्रीः

कर्पूरस्तवराजः ।

ॐ नमस्त्रिपुरसुंदर्यै

कर्पूरं मध्यमांत्यस्वरपररहितं सेंदुवामाक्षियुक्तं
बीजं ते मातरेतत्त्रिपुरहरवधु ! त्रिः कृतं ये जपंति ।
तेषां गद्यानि पद्यानि च मुखकुहरादुल्लसंत्येव वाचः
स्वच्छंदं ध्वांतधाराधररुचिरुचिरे ! सर्वसिद्धिं गतानाम् १

प्रणम्य श्रीगुरुं देवमसितां च तथैव च ।
कर्पूरस्तवराजस्य व्याख्यां कुर्वे सुभक्तये ॥ १ ॥

हे मातः, मध्यमांत्यस्वरपररहितं सेंदुवामाक्षियुक्तं ते बीजं । मध्यमौ चांत्यश्च मध्यमांत्याः मध्यमांत्याश्च ते स्वराः मध्यमांत्यस्वराः मध्यमांत्यस्वराश्च परौ च मध्यमांत्यस्वरपराः मध्यमांत्यस्वरपरैः रहितं मध्यमांत्यस्वरपररहितं—एतादृशं ॥ पुनः । सेंदुवामाक्षियुक्तं—इंदुना सहितं सेंदु । सेंदु च तत् वामक्षि च सेंदुवामक्षि । सेंदुवामाक्ष्णा युक्तं सेंदुवामाक्षियुक्तं एतादृशं कर्पूरं कर्पूरशब्द इत्यर्थः ॥ ते बीजं । ते तव बीजं । आद्यबीजं ज्ञेयम् ॥ हे त्रिपुरहरवधु, एतत्ते बीजं त्रिःकृतं ये जपंति तेषां गद्यानि च परं पद्यानि मुखकुहरादुल्लसंत्येव । हरतीति हरः त्रिपुरस्य हरः त्रिपुरहरः त्रिपुरहरस्य वधूः त्रिपुरहरवधूः तस्याः संबोधने हे त्रिपुरहर-

वधु, एतत्ते बीजं आद्यबीजं त्रिः कृतं त्रिभिरावृत्तं त्रिः कृतं ये पुरुषा जपंति तेषां पुरुषाणां गद्यानि च परं पद्यानि संस्कृताः श्लोकाश्च । मुखकुहरात् । मुखमेव कुहरं मुखकुहरं तस्मान्मुखकुहरात् । मुख-रूपगुहाया इत्यर्थः । उल्लसंत्येव निष्क्रामंत्येव हे ध्वांतधाराधररुचि-रुचिरे, सर्वसिद्धिं गतानां तेषां स्वच्छंदं वाचः मुखकुहरादुल्लसंति ध्वांतस्य धारा ध्वांतधारा धरतीति धरः ध्वांतधारायाः धरः ध्वांत-धाराधरः । ध्वांतधाराधरस्य रुचिः ध्वांतधाराधररुचिः । ध्वांतधारा-धररुचिवत् रुचिरा ध्वांतधाराधररुचिरुचिरा तस्याः संबुद्धौ हे ध्वां-तधाराधररुचिरुचिरे । सर्वसिद्धिमिति । सर्वा चासौ सिद्धिश्च सर्व-सिद्धिः तां सर्वसिद्धिं गतानां प्राप्तानां तेषां स्वच्छंदं स्वतंत्र वाचः वाण्यो मुखकुहरादुल्लसंति ॥

सारवोधिनी—

कृष्णा करालवदना कीर्णकेशा कुमारसूः ।
कलुषं मे कलयतु कौशिकी कंटकार्दिनी ॥ १ ॥

हे जननि । मध्यमांतिमस्वरपरहीनं साब्जं दक्षिणेतरनेत्रयुतं कर्पूरं । इति पदं (कर्पूरपदे मध्यमौ स्वरौ "क" मध्यस्थोऽकारः "पूं" मध्यस्थ ऊकारः । अंत्यस्वरश्च "र" मध्यस्थोऽकारस्तैर्हीनं पुनश्च पराभ्यां हीनं इत्येवं कृते क् मात्रं रेफमात्रं चावशिष्यते तदेव सानुस्वारं वामनेत्रेण दीर्घेकारेण युतमेतावता क्रीं- इति सिद्धं) तव पूर्वं बीजं ज्ञेयम् । हे त्रिपुरासुरारिमहिले । एतत्पूर्वोक्तं ते बीजं त्रिभिरावर्तितं ये भक्ता जपंति तेषां गद्यरूपाणि च संस्कृतानि श्लो-करूपाणि पद्यानि वदनकंदरान्निष्क्रामंत्येव । हे गाढतिमिरकंधर-

रुचिरुचिरे, निखिलसिद्धिं प्राप्तानां तेषां स्वतंत्रं वाण्यो मुखकुहराद्दुल्लसंतीति मंत्रमयसूक्ष्मरूपेण वर्णयति ।। १ ।।

ईशानः सेंदुवामश्रवणपरिगतो बीजमन्यन्महेशि !
द्वंद्वं ते मंदचेता यदि जपति जनो वारमेकं कदाचित् ।
जित्वा वाचामधीशं धनदमपि चिरं मोहयत्यंबुजाक्षी
वृंदं चंद्रार्धचूडे ! प्रभवति स महाघोरशावावतंसे ! ।।२।।

हे महेशि, सेंदुवामश्रवणपरिगतः ईशानस्तेऽन्यद्बीजं । इंदुना सह वर्तमानः सेंदुः सेंदुश्चासौ वामश्रवणश्च सेंदुवामश्रवणः । सेंदुवामश्रवणं परिगतः सेंदुवामश्रवणपरिगतः । एतादृश ईशानः ते तवान्यद्बीजं द्वितीयं बीजं । मंदचेता जनः कदाचिदेकवारं द्वंद्वं यदि जपति । मंदं चेतो यस्य सः मंदचेताः । कस्मिंश्चित्काले । तर्हि वाचामधीशं च परं धनदमपि चिरं जित्वा । अंबुजाक्षीवृंदं मोहयति । धनं ददातीति धनदस्तं धनदं । अंबुनि जातमबुजं । अंबुजमिवाक्षिणी यासां ताः अंबुजाक्ष्यः । अंबुजाक्षीणां वृंदं अंबुजाक्षीवृंदं । तदंबुजाक्षीवृंदं । हे चंद्रार्धचूडे—हे महाघोरशावावतंसे । स प्रभवति । चंद्रस्यार्धं चंद्रार्धं चंद्रार्धं चूडायां यस्याः सा चंद्रार्धचूडा तस्याः संबोधने हे चंद्रार्धचूडे । घोरौ च तौ शावौ च घोरशावौ । महांतौ च तौ घोरशावौ च । महाघोरशावौ । महाघोरशावौ अवतंसौ यस्याः सा महाघोरशावावतंसा । तस्याः संबोधने हे महाघोरशावावतंसे । स प्रभवति स जनः समर्थो भवति ।। २ ।।

सा० महाकालो महेश्वरः—इति श्रुतेः हे उत्पत्तिस्थितिप्रलयसाक्षिमहेशदयिते, स शशांकः वामश्रोत्रमिलित ईशानः इति पदं (बिंदुशिरस्कः वामश्रोत्रेण दीर्घोकारेण च सहित ईशानो हकारः, इति कृते

हूँ इति सिद्धं) त्वदीयं पूर्वोक्तबीजादन्यत्कूर्चबीजं बालिशोऽपि जनः कस्मिंश्चित्काले द्विरावृत्तं (हूँहूँ) इत्येवंरूपमेकवारमपि यदि जपति तर्हि वाग्विलासैर्बृहस्पतिं धनवैभवविलासैर्धनदमपि जित्वा हे विकसितहिमकरखंडमौले! हे भयजनकशवाभरणे! कमलनयना-यूथं मोहयति च परं स सर्वस्यापि जगतः प्रभुर्भवतीति जपे काल-नियमाभावजपफलप्रदर्शनपुरःसरं कूर्चबीजद्वयमुद्धरति ॥ २ ॥

ईशो वैश्वानरस्थः शशधरविलसद्वामनेत्रेण युक्तो
बीजं ते द्वंद्वमन्यद्विगलितचिकुरे! कालिके! ये जपंति।
द्वेष्टारं घ्नन्ति ते वै त्रिभुवनमपि ते वश्यभावं नयंति
सृक्कद्वंद्वास्रधाराद्वयधरवदने! दक्षिणे! कालिके! च ३

हे विगलितचिकुरे शशधरविलसद्वामनेत्रेण युक्तो वैश्वानरस्थ ईशस्तेऽन्यबीजं। विगलिताः चिकुराः यस्याः सा विगलितचिकुरा तस्याः संबोधने हे विगलितचिकुरे, धरतीति धरः शशस्य धरः शशधरः शशधरेण विलसत् शशधरविलसत्। शशधरविलसच्च तद् वामनेत्रं च शशधरविलसद्वामनेत्रं तेन शशधरविलसद्वामनेत्रेण युक्तो वैश्वानरस्थ ईशः वैश्वानरे तिष्ठतीति वैश्वानरस्थः। हे कालिके, द्वंद्वं ये जपंति ते द्वेष्टारं घ्नन्ति ॥ हे सृक्कद्वंद्वास्रधाराद्वयधरवदने। द-क्षिणे कालिके चेति ये जपंति। ते त्रिभुवनमपि वश्यभावं नयंति अस्रस्य धारा अस्रधारा अस्रधाराया द्वयं अस्रधाराद्वयं। धरती-ति धरं अस्रधाराद्वयस्य धरं अस्रधाराद्वयधरं। सृक्कस्य द्वंद्वं सृक्कद्वंद्वं सृक्कद्वंद्वे अस्रधाराद्वयधरं। सृक्कद्वंद्वास्रधाराद्वयधरं। सृक्कद्वंद्वास्र-धाराद्वयधरं वदनं यस्याः सा सृक्कद्वंद्वास्रधाराद्वयधरवदना। तस्याः संबोधने हे सृक्कद्वंद्वास्रधाराद्वयधरवदने ॥ ३ ॥

सा० हे विकीर्णकेशकलापे, मृगांकविलसद्दक्षिणेतराक्ष्णा युतो वैश्वानरस्थः ईशः इतिपदं (मृगांकेन बिंदुना शोभमानो दक्षिणेतराक्ष्णा दीर्घेकारेण युक्तश्च परं वैश्वानरस्थो रेफयुतो हकारः। एतावता हकाररकारबिंदुदीर्घेकारैर्मिलितं ह्रीँ इति सिद्धं) पूर्वोक्तादन्यत् त्वदीयं द्विरावृत्तं (ह्रीँ ह्रीँ) इत्येवं रूपं मायाबीजं हे कालिके, ये साधका जपंति ते प्रत्यर्थिनो निघ्नन्ति हे सृक्‌युग्मरक्तप्रवाहयुगलधरमुखि, च परं त्रिलोकीमपि स्वाधीनतां नयंतीति मायाबीजोद्धारप्रदर्शनपुरःसरमाह ॥ ३ ॥

ऊर्ध्वं वामे कृपाणं करकमलतले छिन्नमुंडं तथाधः
सव्येऽभीतिं वरं च त्रिजगदघहरे! दक्षिणे! कालिके! च।
जप्त्वैतन्नामवर्णं तव मनुविभवं भावयंत्येवमंब!
तेषामष्टौ करस्थाः प्रकटितवदने! सिद्धय[1]स्त्र्यंबकस्य ॥४॥

हे त्रिजगदघहरे, हे प्रकटितवदने, हे अंब, वामे करकमलतले ऊर्ध्वं कृपाणं। अधः छिन्नमुंडं। तथाऽसव्ये भीतिं। च परं वरं। दक्षिणे कालिके एतन्नामवर्णं जप्त्वा। एवं तव मनुविभवं ये भावयंति तेषां त्र्यंबकस्याष्टौ सिद्धयः करस्थाः। त्रीणि च तानि जगंति च त्रिजगंति। त्रिजगतां अघं त्रिजगदघं। हरतीति हरा। त्रिजगदघस्य हरा त्रिजगदघहरा तस्याः संबोधने हे त्रिजगदघहरे, प्रकटितं वदनं यस्याः सा प्रकटितवदना तस्याः संबोधने हे प्रकटितवदने, मनोर्विभवो मनुविभवस्तं मनुविभवं। करे तिष्ठंति ताः करस्थाः ॥ ४ ॥

---

१ अणिमा महिमा चैव गरिमा लघिमा तथा। प्राप्तिः प्राकाम्यमीशित्वं वशित्वं चाष्टसिद्धयः॥ मेरुतंत्रे. प्रक० ५ श्लो० ५५०

सा० हे त्रितयलोककिल्बिषनाशिनि, हे प्रकटीकृतवक्त्रे, हे मातः वामपाणितले ऊर्ध्वं खड्गं अधःकरे छिन्नं शिरः, तथा सव्यकरे ऊर्ध्वाधः अभयं वरं च (दधतीं त्वां ध्यात्वा) पश्चाद् दक्षिणे कालिके, इत्येतन्नामवर्णं जप्त्वा ते मंत्रविभवं ये भावयंति तेषां साधकानां दक्षिणामूर्तिशिवसंबंधिन्योऽष्टावणिमाद्याः सिद्धयो हस्तगा एवेति बीजसप्तककथनांते दक्षिणे कालिके चेति विन्यस्यति ॥४॥

[1]वर्गाद्यं वह्नियुक्तं विधुरतिललितं तत्त्रयं कूर्चयुग्मं
लज्जाद्वंद्वं च पश्चात्स्मितमुखि! तदधष्ठद्वयं योजयित्वा॥
मातर्ये ये जपंति स्मरहरमहिले! भावयंतः स्वरूपं
ते लक्ष्मीलास्यलीलाकमलदलदृशः कामरूपा भवंति ५

हे स्मितमुखि, वह्नियुक्तं विधुरतिललितं वर्गाद्यं तत्त्रयं कूर्चयुग्मं पश्चाल्लज्जाद्वंद्वं तदधः ठद्वयं योजयित्वा हे मातः, हे स्मरहरमहिले, स्वरूपं भावयंतो ये ये पुरुषा जपंति ते लक्ष्मीलास्यलीलाकमलदलदृशः कामरूपा भवंति। स्मितं मुखं यस्याः सा स्मितमुखी तस्याः संबोधने हे स्मितमुखि, वह्निना युक्तं वह्नियुक्तं विधुश्च रतिश्च विधुरती। विधुरतिभ्यां ललितं विधुरतिललितं। हरतीति हरः। स्मरस्य हरः स्मरहरः। स्मरहरस्य महिला स्मरहरमहिला तस्याः संबोधने हे स्मरहरमहिले, लक्ष्म्याः लास्यं लक्ष्मीलास्यं लक्ष्मीलास्यस्य लीला येषां ते लक्ष्मीलास्यलीलाः। कमलस्य दलं कमलदलं। कमलदलवत् दृशौ येषां ते कमलद-

---

१ ग्रंथान्तरे. वर्गाद्यं वह्निसंयुक्तं रतिबिंदुसमन्वितम्।
एकाक्षरो महामंत्रः सर्वकामफलप्रदः॥ १॥
एतावता " क्रीं " इत्येकाक्षरो महामंत्रः॥ इति रहस्यम्॥

लदृशः । लक्ष्मीलास्यलीलाश्च ते कमलदलदृशश्च लक्ष्मीलास्यलीला-कमलदलदृशः । कामं रूपं येषां ते कामरूपाः । यद्वा कामस्येव रूपं येषां ते कामरूपाः ॥ ५ ॥

सा०हे स्मेरवदने, कृशानुसहितं चंद्ररतिललितं वर्गपूर्व (रकार-दीर्घकारानुस्वारैर्मीलितं वर्गाद्यक्षरं ककारं, इति कृते क्रीँ, इति सिद्धं त्रिरावृत्तं क्रीं क्रीं क्रीं इति । कूर्चद्वयं (हूँहूँ) इति ततश्च लज्जा-द्वंद्वं (ह्रीँ ह्रीँ) तदधः ठद्वयं (स्वाहा) इति योजयित्वा हे अंब, हे मारहरगृहिणि त्वत्परमं चिंतयन्तो ये ये पुरुषा जपंति ते ते रमानृत्यनिधुवननलिनदलाक्षाः कंदर्परूपा भवंतीति “ अथ हैनां ब्रह्मरंध्रे ब्रह्मरूपिणीमाप्नोति शुभगां कामरेफेंदिराबिंदुमेलनरूपामे-तत्त्रिगुणितामादौ तदनु कूर्चद्वयं भुवनाद्वयं दक्षिणे कालिके इत्य-स्ति मुख्यता तदनु बीजसप्तकमुच्चार्य बृहद्भानुजायामुच्चारयेत् सतु शिवमयो भवेत्सर्वसिद्धीश्वरो भवेद्गतिस्तस्याकुण्ठिता भवेत् स तु नारीश्वरः स तु वागीश्वरः स तु देवेश्वरः स तु सर्वेश्वरः ” इत्या-दिकालिकाश्रुत्युक्तमंत्रोद्धारसाम्यार्थं पुनरेतद्बीजसप्तकं स्वाहांतं मनु-मुद्धरति ॥ ५ ॥

प्रत्येकं वा द्वयं वा त्रयमपि च परं बीजमत्यंतगुह्यं
त्वन्नाम्ना योजयित्वा सकलमपि सदा भावयंतो जपंति ।
तेषां नेत्रारविंदे विहरति कमला वक्त्रशुभ्रांशुबिंबे
वाग्देवी देवि ! मुंडस्रगतिशयलसत्कंठपीनस्तनाढ्ये ! ॥६॥

हे मुंडस्रगतिशयलसत्कंठपीनस्तनाढ्ये, हे देवि, प्रत्येकं वा द्वयं वा त्रयमपि परं अत्यंतगुह्यं बीजं त्वन्नाम्ना योजयित्वा सकलमपि सदा भावयंतः संतो ये जपंति तेषां नेत्रारविंदे कमला विहरति ।

वक्त्रशुभ्रांशुबिंबे वाग्देवी विहरति। पीनौ च तौ स्तनौ च पीनस्तनौ। कंठश्च पीनस्तनौ च। कंठपीनस्तनाः। मुंडानां स्रक् मुंडस्रक्। अतिशयेन लसंतोऽतिशयलसंतः। मुंडस्रजाऽतिशयलसंतो मुंडस्रगतिशयलसंतः। मुंडस्रगतिशयलसंतश्च ते कंठपीनस्तनाश्च मुंडस्रगतिशयलसत्कंठपीनस्तनाः। मुंडस्रगतिशयलसत्कंठपीनस्तनैराढ्या मुंडस्रगतिशयलसत्कंठपीनस्तनाढ्या। तस्याः संबुद्धौ हे मुंडस्रगतिशयलसत्कंठपीनस्तनाढ्ये, विहरति विलासं करोति ॥ ६ ॥

सा० हे नरमुंडमालाविलसद्ग्रीवामांसलवक्षोजयुते, हे देवि, प्रत्यक्षरं वा द्वयं वा त्रितयमपि अथवा सकलं चातिगोप्यं बीजं त्वन्नाम्ना योजयित्वा सदा ध्यायंतः संतो ये जपंति तेषां जापकानां नयनारविंदेऽरविंदालया विहरति च परं वदनशीतांशुबिंबे भाषा विलसतीति परमकारुण्यं द्योतयन्नाह ॥ ६ ॥

गतासूनां बाहुप्रकरकृतकांचीपरिलस-
न्नितंबां दिग्वस्त्रां त्रिभुवनविधात्रीं त्रिनयनाम्।
स्मशानस्थां तल्पे शवहृदि महाकालसुरत-
प्रसक्तां त्वां ध्यायन् जननि! जडचेता अपि कविः ॥ ७॥

हे जननि, जडचेता अपि गतासूनां बाहुप्रकरकृतकांचीपरिलसन्नितंबां दिग्वस्त्रां त्रिभुवनविधात्रीं त्रिनयनां श्मशानस्थां शवहृदि तल्पे महाकालसुरतप्रसक्तां त्वां ध्यायन् सन् कविर्भवति। जनयति सा जननी तस्याः संबोधने हे जननि। जडं चेतो यस्य स जडचेताः! गता असवो येषां ते गतासवस्तेषां गतासूनां। बाहूनां प्रकरः बाहुप्रकरः। बाहुप्रकरेण कृता बाहुप्रकरकृता। बाहुप्रकरकृता चासौ कांची च बाहुप्रकरकृतकांची। बाहुप्रकरकृतकांच्या प-

रिलसन्तौ नितंबौ यस्याः सा बाहुप्रकरकृतकांचीपरिलसन्नितंबा तां बाहुप्रकरकृतकांचीपरिलसन्नितंबाम् । दिश एव वस्त्राणि यस्याः सा दिग्वस्त्रा ताम् । दिग्वस्त्राम् । त्रीणि च तानि भुवनानि च त्रिभुवनानि त्रिभुवनानां विधात्री त्रिभुवनविधात्री ताम् । त्रिभुवनविधात्रीं कर्त्रीम् । त्रीणि नयनानि यस्याः सा त्रिनयना तां । त्रिनयनाम् । श्मशाने तिष्ठति सा श्मशानस्था तां श्मशानस्थाम् । शबस्य हृद् शबहृद् तस्मिन् शबहृदि । तल्पे शय्यायाम् । महाकालेन सुरतं महाकालसुरतम् । महाकालसुरते प्रसक्ता महाकालसुरतप्रसक्ता ताम् महाकालसुरतप्रसक्ताम् । सुरतं क्रीडा । एतादृशीं त्वां ध्यायन्सन् ॥७॥

सा० हे अम्ब! अत्यंतलिगुरपि शवानां भुजनिकररचितकटिसूत्रविलसज्जघनां ककुप्प्रावरणां त्रैलोक्यस्य कर्त्रीं त्र्यंबकां शवदहनभूमिस्थां गतप्राणहृदयशय्यायां महेश्वरविपरीतरतात्यासक्तां त्वां चिंतयन् सन् कविर्भवतीत्याह ॥ ७ ॥

शिवाभिर्घोराभिः शवनिवहमुण्डास्थिनिकरैः
परं संकीर्णायां प्रकटितचितायां हरवधूम् ।
प्रविष्टां संतुष्टामुपरि सुरते नातियुवतीं
सदा त्वां ध्यायन्ति क्वचिदपि न तेषां परिभवः ॥ ८ ॥

हे हरवधु, घोराभिः शिवाभिः शवनिवहमुण्डास्थिनिकरैः परं संकीर्णायां प्रकटितचितायां प्रविष्टामुपरिसुरतेन संतुष्टामतियुवतीं त्वां सदा ये ध्यायंति तेषां क्वचिदपि परिभवो न भवति । हरस्य वधूः हरवधूः । तस्याः संबुद्धौ हे हरवधु, शवानां निवहाः शवनिवहाः । मुण्डानि च अस्थीनि च मुंडास्थीनि । शवनिवहाश्च मुंडास्थीनि च शवनिवहमुंडास्थीनि । शवनिवहमुंडास्थ्नां निकराः

शवनिवहमुंडास्थिनिकराः । तैः शवनिवहमुंडास्थिनिकरैः । परमत्यंतम् । संकीर्णायां व्याप्तायाम् । प्रकटिता चासौ चिता च प्रकटितचिता तस्यां प्रकटितचितायाम् । प्रविष्टाम् । उपरि चितोपरि । सुरतेन क्रीडया संतोषधरां यवतीरतिक्रान्ताऽतियुवती तामतियुवतीम् । तेषां पुरुषाणाम् । सदा निरंतरं । परिभवः नेति अनादरो न भवति ॥ ८ ॥

सा० हे शिवपत्नि, भयजनकाभिः क्रोष्ट्रीभिः गतासुसमूहमुंडास्थिकप्रकरैरत्यंतं व्याप्तायां ज्वलच्चितायां प्रविष्टां तत्रैवोपरि सुरतक्रीडयाऽतिसंतुष्टां यौवनवतीं (वाऽतिक्रांतयुवतीम्) त्वां निरंतरं ये साधकाश्चिंतयंति तेषां साधकनृणां सर्वदेशेष्वपि निखिलजगन्नाशकाले " यथा ध्यानस्य संसर्गात्कीटको भ्रमरायते । तथा समाधियोगेन ब्रह्मीभूतो भवेन्नरः " इत्युक्तेः संप्राप्तशिवरूपत्वान्नास्ति तिरस्कार इत्याह ॥ ८ ॥

वदामस्ते किं वा जननि ! वयमुच्चैर्जडधियो
न धाता नापीशो हरिरपि न ते वेत्ति परमम् ।
तथापि त्वद्भक्तिर्मुखरयति चास्माकमसिते !
तदेतत्क्षंतव्यं न खलु पशुरोषः समुचितः ॥ ९ ॥

हे जननि, जडधियो वयं उच्चैस्ते किं वदामः । धाता न, ईशो न, हरिरपि ते परमं न वेत्ति । हे असिते, तथापि त्वद्भक्तिरस्माकं मुखरयति तदेतत्क्षन्तव्यं पशुरोषः समुचितो न खलु । जडा धियो येषां ते जडधियः । उच्चैरतिस्वरैः । परमं स्वरूपं मुखरं करोतीति मुखरयति वाचालं करोति । पशुषु रोषः पशुरोषः । सम्यग् उचितः समुचितः । योग्यो न भवति ॥ ९ ॥

सा० हे मातः त्वदीयं पारमार्थिकं मनोवागतीतं रूपं सकलप्रपंचस्रष्टा धाता याथातथ्येन न वेत्ति । च परं सकलप्रपंचसंहर्ता महेशोऽपि न वेत्ति । तथा सकलप्रपंचपालको हरिरपि न वेत्ति । तथा बालिशा वयं अतितरं ते रूपं प्रति किं वदामः । (नालं वक्तुं जडधिषणात्वात्) हे कालिके, तथापि वक्तुमयोग्यानस्मान् त्वदीया भक्तिरेव वाचालं करोतीत्येतत्प्रवर्तनं सोढव्यं (घृणा लज्जा भयं शंका जुगुप्सा चेति पंचमी । कुलं शीलं तथा जातिरष्टौ पाशा इमे स्मृताः ॥ पाशबंधः पशुः प्रोक्तः पाशमुक्तः स्वयं शिवः) इत्युक्तेः पशुष्वविद्यया पाशाष्टकेषु मादृशेषु पामरजनेषु रोषो न योग्यः किलेति ब्रह्मादीनामप्यगोचरे मद्रूपे वाक्यप्रयोगाय प्रवर्तमानस्य तवायं दीर्घापराधः कथं क्षंतव्य इत्याशंकासमाधानपूर्वकमाह ॥ ९ ॥

समन्तादापीनस्तनजघनधृग्यौवनवति !
रतासक्तो नक्तं यदि जपति भक्तस्तव मनुम् ॥
विवासास्त्वां ध्यायन् गलितचिकुरस्तस्य वशगाः ।
समस्ताः सिद्धौघा भुवि चिरतरं जीवति कविः ॥ १० ॥

हे समन्तादापीनस्तनजघनधृग्यौवनवति, विवासा गलितचिकुरो भक्तः नक्तं रतासक्तः त्वां ध्यायन्सन् यदि तव मनुं जपति तस्य समस्ताः सिद्धौघाः वशगाः च परं भुवि कविः सन् चिरतरं जीवति । स्तनौ च जघने च स्तनजघने । आपीने च ते स्तनजघने च आपीनस्तनजघने आपीनस्तनजघनयोः धृग् आपीनस्तनजघनधृक् । आपीनस्तनजघनधृक् च तत् यौवनं च आपीनस्तनजघनधृग्यौवनं । समंतात् आपीनस्तनजघनधृग्यौवनं विद्यते अस्याः सा समंतादापीनस्तन-

जघनधृग्यौवनवती । तत्संबुद्धौ हे समंतादापीनस्तनजघनधृग्यौवनवति, विगतानि वासांसि यस्य सः विवासाः । गलिताश्चिकुरा यस्य सः गलितचिकुरः । नक्तं रात्रौ । रते आसक्तः रतासक्तः । मनुं मंत्रं । सिद्धानां ओघाः सिद्धौघाः । वशं गच्छंति ते वशगाः । अतिशयेन चिरं इति चिरतरम् । अत्र समंतादापीनस्तनजघनधृग्यौवनवतीमितिपाठे त्वां—इत्यस्य विशेषणं । यद्वा—समंतादापीनस्तनजघनधृग्यौवनवतीरतासक्तो नक्तमिति पाठे—समंतादापीनस्तनजघनधृग्यौवनवत्यारतासक्तः समंतादापीनस्तनजघनधृग्यौवनवतीरतासक्तः, इति भक्तविशेषणमूह्यं सूक्ष्मबुद्धिभिः ॥ १० ॥

सा० हे परितः मांसलकुचनितंबधृग्यौवनवति, दिगंबरः विकीर्णचिकुरकलापो रात्रौ सुरतपरो (यद्वा परितः मांसलकुचनितंबधृग्यौवनवतीसुरतासक्तः) भक्तः (यद्वा परितः मांसलकुचनितंबधृग्यौवनवतीं) त्वां चिंतयन् सन् तावकीन मंत्रं जपति तस्य भक्तस्य निखिलाः सिद्धिनिचयाः स्वाधीना भवंति पृथिव्यां कविर्भूत्वा दीर्घसमयं जीवतीति पाठांतरकल्पना च याथातथ्येनोह्या निखिलतंत्रस्वतंत्रमनीषिभिः ॥ १० ॥

समास्वस्थीभूतो जपति विपरीतो यदि सदा
विचिंत्य त्वां ध्यायन्नतिशयमहाकालसुरताम् ।
तदा तस्य क्षोणीतलविहरमाणस्य विदुषः
करांभोजे वश्या हरवधु ! महासिद्धिनिवहाः ॥ ११ ॥

हे हरवधु, समास्वस्थीभूतः विपरीतः सदा अतिशयमहाकालसुरतां त्वां विचिंत्य ध्यायन् सन् यदि जपति तदा क्षोणीतलविहरमानस्य विदुषः तस्य करांभोजे महासिद्धिनिवहाः वश्या भवं-

ति ॥ हरस्य वधूः हरवधूः तस्याः संबुद्धौ हे हरवधु, आसमंतात्स्वस्थः आस्वस्थः । सम्यक् आस्वस्थः समास्वस्थः । न समास्वस्थः असमास्वस्थः । असमास्वस्थः समास्वस्थः यथा संपद्यमानस्तथाभूतः इति समास्वस्थीभूतः । विपरीतः विपरीतरतासक्तः । महाकालेन सुरतं महाकालसुरतं । अतिशयं महाकालसुरतं यस्याः सा अतिशयमहाकालसुरता तां अतिशयमहाकालसुरताम् । विहरतेऽसौ विहरमानः क्षोणीतले विहरमाणः क्षोणीतलविहरमाणः तस्य क्षोणीतलविहरमाणस्य । वेत्तीति विद्वान् तस्य विदुषः । करावेव अंभोजं करांभोजं तस्मिन् करांभोजे । सिद्धीनां निवहाः सिद्धिनिवहाः । निवहाः समूहाः । वश्याः वशगाः । अत्र समास्वस्थीभूतो जपति विपरीतामिति पाठे—समाः समकायशिराः स्वस्थीभूतो निश्चलचित्तः विपरीतां पुरुषायितां त्वामिति ज्ञेयम् ॥ ११ ॥

सा० हे मृडानि, अतिनिश्चलमानसः (यद्वा समानकायशीर्षः । स्वस्थचित्तः) नार्यायितः (पुरुषायितां वा) वहु महेश्वरनिधुवनां त्वां सर्वदा विचिंत्य चिंतयन् सन् यदि जपति तर्हि सर्वं सहातलक्रीडमानस्य ज्ञानिनः पाणिपद्मे निखिलसिद्धिप्रकरा वशगाः स्युरित्याह पाठांतरपुरःसरम् ॥ ११ ॥

प्रसूते संसारं जननि ! भवती पालयति य-
त्समस्तं क्षित्यादि प्रलयसमये संहरति च ।
अतस्त्वां धातापि त्रिभुवनपतिः श्रीपतिरहो
महेशोऽपि प्रायः सकलमपि किं स्तौति भवतीम् ॥१२॥

हे जननि, भवती संसारं प्रसूते । यत्समस्तं क्षित्यादि तत् भवती पालयति । च परं प्रलयसमये भवती संहरति । अतः त्रिभुवनपतिः

धातापि श्रीपतिरपि महेशोऽपि प्रायः भवतीं सकलमपि स्तौति किम् । जनयति सा जननी तस्याः संबोधने हे जननि । भवती त्वं । प्रसूते जनयति । क्षितिरादिर्यस्य तत् क्षित्यादि । संहरति संहारं करोति । अतः कारणात् । त्रीणि च तानि भुवनानि च त्रिभुवनानि । त्रिभुवनानां पतिः त्रिभुवनपतिः । श्रियाः पतिः श्रीपतिः । प्रायः बहुधा । सकलमपि संपूर्णमपि स्तौति किं अपितु न ॥१२॥

सा० हे मातः, भवती भवं जनयति । यन्निखिलं वसुमत्यादि तदपि पाति च संहारकाले वसुमत्यादि सर्वं भवती हरति । अतो जगत्स्रष्टा धाता जगद्रक्षको रमापतिर्जगन्नाशकः शिवोऽपि प्रायः भवतीं साकल्येन स्तौति किं ?, काकर्थेन देवत्रय्यपि त्वत्स्तवनेऽसमर्थेति सूचयति ॥ १२ ॥

अनेके सेवंते हरगृहिणि गीर्वाणनिवहान्
विमूढास्ते मातः! किमपि नहि जानंति परमम् ।
समाराध्यामाद्यां हरिहरविरिंचादिभिरपि
प्रपन्नोऽस्मि स्वैरं रतिरसमहानंदनिरताम् ॥ १३ ॥

हे हरगृहिणि अनेके गीर्वाणनिवहान् सेवंते । हे मातः, विमूढाः ते किमपि परमं नहि जानंति । हरिहरविरंचादिभिरपि समाराध्यां आद्यां स्वैरं रतिरसमहानंदनिरतां प्रपन्नोऽस्मि । हरस्य-गृहिणी हरगृहिणी तत्संबुद्धौ हेहरगृहिणि । अनेके लोकाः गीर्वाणानां निवहाः गीर्वाणनिवहाः तान् गीर्वाणनिवहान् । विशेषेण मूढाः विमूढाः । ते तव । परमं परमतत्त्वं । किमपि महता कष्टेनापि । हरिश्च हरश्च विरंचश्च हरिहरविरंचाः । हरिहरविरंचाः आदिर्येषां ते हरिहरविरंचादयः तैः हरिहरविरंचादिभिरपि । आ-

राधितुं योग्या आराध्या। सम्यगू आराध्या समाराध्या । तां समाराध्यां । आदौ भवा आद्या तां आद्यां। स्वैरं सुखेन। रतिरेव रसः रतिरसः। महांश्चासौ आनंदश्च महानंदः । रतिरसस्य महानंदः रतिरसमहानंदः । रतिरसमहानंदे निरता रतिरसमहानंदनिरता । तां रतिरसमहानंदनिरतां। त्वां अस्मि अहं अस्मीत्यहमर्थेऽव्ययं। प्रपन्नः प्राप्तः । अत्र अनेके सेवंते भवदधिकगीर्वाणनिवहान्—इतिपाठे भवत्या अधिकाः भवदधिकाः । भवदधिकाश्च ते गीर्वाणनिवहाश्च भवदधिकगीर्वाणनिवहाः । तान् भवदधिकगीर्वाणनिवहान्॥ १३॥

हे मातः (यद्वा हेहरगृहिणि), लोका निर्लिंपयूथान् (यद्वा भवत्या अधिका देवा इति मत्वा निर्लिंपयूथान्) भजंति ते वैधेयाः परमार्थवस्तुभूतं त्वत्स्वरूपं किमपि नहि जानंति । अहं तु ब्रह्मविष्णुमहेश्वरप्रभृतिभिराराध्यमानां रतिरससंतोषतत्परां पूर्वां स्वच्छंदतयैव शरणागतोऽस्मीति दर्शयति पाठांतरपूर्वकम् ॥ १३ ॥

धरित्री कीलालं शुचिरपि समीरोऽपि गगनं
त्वमेका कल्याणी गिरिशरमणी कालि! सकलम् ।
स्तुतिः का ते मातर्निजकरुणया मामगतिकं
प्रसन्ना त्वं भूया न भवमनुभूयान्मम जनुः ॥ १४ ॥

हे कालि , धरित्री कीलालं शुचिरपि समीरोऽपि गगनं कल्याणी गिरिशरमणी सकलं एका त्वं असि । हे मातः , ते स्तुतिः का । निजकरुणया अगतिकं मां त्वं प्रसन्ना भूयाः । मम जनुः भवं नानुभूयात्। कल्याणं अस्ति अस्या इति कल्याणी । गिरौ शेते इति गिरिशः । गिरिशस्य रमणी गिरिशरमणी । सकलं ब्रंह्माडं । ते तव । निजा चासौ करुणा च निजकरुणा तया निजकरुणया ।

नास्ति गतिर्यस्य सः अगतिकः तं अगतिकं । मां ममोपरि । भवतीति भवस्तं भवम् ॥ १४ ॥

सा० हे असिते, भद्रगुणशालिनी रुद्राणी त्वमेवाद्वितीया पृथिव्यप्तेजोवाय्वाकाशरूपासि किल, हे मातः, दृष्टांतोपमादीनां त्वव्द्यतिरिक्तत्वाभावात्का त्वदीया स्तुतिः । अतः स्वकारुण्येनानन्यगतिकं मां त्वं प्रसन्ना भूयाः । मम जननं पुनर्जन्माभावमनुभूयाच्चेति प्रार्थयते ॥ १४ ॥

श्मशानस्थः स्वस्थो गलितचिकुरो दिक्पटधरः
सहस्रं त्वर्काणां निजगलितवीर्येण कुसुमम् ॥
जपँस्त्वत्प्रत्येकं मनुमपि तव ध्याननिरतो
महाकालि! स्वैरं स भवति धरित्रीपरिवृढः ॥ १५ ॥

हे महाकालि, श्मशानस्थः स्वस्थः गलितचिकुरः दिक्पटधरः निजगलितवीर्येण अर्काणां सहस्रं कुसुमं तव ध्याननिरतः त्वत्प्रत्येकं मनुमपि जपन्सन् जुहुयात्स स्वैरं धरित्रीपरिवृढः भवति । श्मशाने तिष्ठतीति श्मशानस्थः । स्वस्थः स्वस्थचित्तः । गलिताः चिकुराः यस्य सः गलितचिकुरः मुक्तकेशः । दिश एव पटः दिक्पटः । धरतीति धरः । दिक्पटस्य धरः दिक्पटधरः । गलितं च तत् वीर्यं च गलितवीर्यं । निजं च तत् गलितवीर्यं च निजगलिवीर्यं । तेन निजयलितवीर्येण । ध्याने निरतः ध्याननिरतः । एकं एकं प्रतीति प्रत्येकं । तव प्रत्येकं त्वत्प्रत्येकं । स्वैरं सुखेन । धरित्र्याः परिवृढः धरित्रीपरिवृढः । चक्रवर्तीत्यर्थः ॥ १५ ॥

सा० हे महाकालिके, महाश्मशानस्थो निश्चलांतःकरणः कीर्णकेशो दिगंबरस्ते ध्यानासक्तः अर्कसमिधां सहस्रं स्वगलित शुक्रेण युतं

कुसुमं (लता कामलता स्वस्त्रीरजश्च) एतत्सर्वमेकीकृत्य मंत्रमपि जपन् प्रत्येकं जुहोति स भक्तः स्वेच्छयैव सकलपृथिवीनायको भवतीति स्तौति ॥ १५ ॥

गृहे संमार्जन्याः परिगलितवीर्यं हि चिकुरं
समूलं मध्याह्ने वितरति चितायां कुजदिने ॥
समुच्चार्य प्रेम्णा मनुमपि सकृत्कालि ! सततं
गजारूढो याति क्षितिपरिवृढः सत्कविवरः ॥ १६ ॥

हे कालि, गृहे संमार्जन्याः परिगलितवीर्यं समूलं चिकुरं मनुमपि प्रेम्णा सकृत्समुच्चार्य कुजदिने मध्याह्ने चितायां वितरति सः सततं गजारूढः क्षितिपरिवृढः सत्कविवरः सन् याति । परिगलितं वीर्यं यस्मिन् सः परिगलितवीर्यः । तं परिगलितवीर्यं । मूलेन सह वर्तमानः समूलः तं समूलं । चिकुरं केशं । कुजस्य दिनं कुजदिनं तस्मिन् कुजदिने । वितरति ददाति । सततं निरंतरं । गजं आरूढः गजारूढः । क्षित्याः परिवृढः क्षितिपरिवृढः । संतश्च ते कवयश्च सत्कवयः सत्कविषु वरः सत्कविवरः । एतादृशः सन् याति गच्छति ॥ १६ ॥

सा० हे कालि, गृहे संमार्जनं कर्म कर्त्र्याः अविच्छिन्नं परितः स्ववीर्यसक्तं केशं भक्त्याऽसकृत् मनुं पठित्वा मध्याह्नकाले मंगलवासरे चितायां यः समर्पयति स भक्तः पृथ्वीपालको नागारूढः सन् निरंतरं महाकविप्रतीक्ष्यश्च भवतीति प्राह ॥ १६ ॥

स्वपुष्पैराकीर्णं कुसुमधनुषो मंदिरमहो !
पुरो ध्यायन्ध्यायन् जपति परमं वा तव मनुम् ।

स गंधर्वश्रेणीपतिरिव कवित्वामृतनदी-
नदीनः पर्यंते परमपदलीनः प्रभवति ॥ १७ ॥

अहो इत्युत्कृष्टसंबोधने, यः स्वपुष्पैः आकीर्णं कुसुमधनुषः मंदिरं पुरः ध्यायन्ध्यायन् सन् तव परमं मनुं जपति स गंधर्वश्रेणीपतिरिव कवित्वामृतनदीनदीनः पर्यंते परमपदलीनः प्रभवति । स्वस्य पुष्पाणि स्वपुष्पाणि तैः स्वपुष्पैः । आकीर्णं व्याप्तं । कुसुमं धनुर्यस्य सः कुसुमधनुः तस्य कुसुमधनुषः कामस्य । मंदिरं योनिं । पुरः अग्रे । गंधर्वाणां श्रेणी गंधर्वश्रेणी । गंधर्वश्रेण्याः पतिः गंधर्वश्रेणीपतिः इव । कवित्वमेव अमृतं कवित्वामृतं । कवित्वामृतस्य नद्यः कवित्वामृतनद्यः । नदीनामिनः नदीनः । कवित्वामृतनदीनां नदीनः कवित्वामृतनदीनदीनः । इनः स्वामी । नदीनः समुद्रः । पर्यंते समाप्तौ । परमपदे लीनः परमपदलीनः ॥ १७ ॥

सा० हे अत्युत्कृष्टसंबोधने, यः साधकः स्वरजोभिः पूर्णं मदनमंदिरं पुरो ध्यात्वा ध्यात्वा यदि तव परमं मनुं जपति स साधको देवगायकपंक्तिनायक इव कवित्वपीयूषवाहिनीवाहिनीनः (कुलागारं पुष्पिताया ध्यात्वा यो जपते नरः । अयुतैकप्रमाणेन साधकः स्थिरमानसः । केवलं गुप्तभावेन स तु विद्यानिधिर्भवेत् ॥ इति कालीतंत्रोक्तेः—संस्थाप्य वामभागे तु शक्तिं स्वामिपरायणाम् ॥ रक्तवस्त्रपरीधानां शिवमंत्रधरां शुभाम् ॥ या शक्तिः सा महादेवी हररूपस्तु साधकः ॥ अन्योन्यचिंतनाद्देवि देवत्वमुपपद्यते ॥ इति रुद्रयामलोक्तेः—स्वस्त्रीविषय एवेदं "तयोरपि बिलेबलादिति" दक्षिणाचारतंत्रवाक्यात् ॥ दक्षवामकुलाचारा अन्योन्यं ते विरोधिनः ॥ तस्मात्तैस्तैर्य आचारः सैव ग्राह्यो न चान्यथेति उत्तरतंत्रोक्तेश्च)

अंतकाले परमपदे श्रीमहाकालमहाकालीसारूप्यपदे लीनो भवतीति दर्शयति ॥ १७ ॥

त्रिपंचारे पीठे शबशिवहृदि स्मेरवदनां
महाकालेनोच्चैर्मदनरसलावण्यनिरताम् ॥
समासक्तो नक्तं स्वयमपि रतानंदनिरतो
जनो यो ध्यायेत्त्वां जननि! किल सः स्यात्स्मरहरः १८

हे जननि, त्रिपंचारे पीठे शबशिवहृदि स्मेरवदनां महाकालेन उच्चैर्मदनरसलावण्यनिरतां त्वां यो जनः स्वयमपि नक्तं समासक्तः रतानंदनिरतः सन् ध्यायेत् स स्मरहरः स्यात् किल । जनयति सा जननी तस्याः संबुद्धौ हे जननि, त्रिभिरावृत्ताः पंच त्रिपंच । त्रिपंच आरा यस्मिन् तत् त्रिपंचारं तस्मिन् त्रिपंचारे ॥ शबश्चासौ शिवश्च शबशिवः । शबशिवस्य हृच्छबशिवहृत् । तस्मिन् शबशिवहृदि । स्मेरं वदनं यस्याः सा स्मेरवदना तां स्मेरवदनां । उच्चैः अतितरां । मदनस्य रसः मदनरसः मदनरसस्य लावण्यं मदनरसलावण्यं । मदनरसलावण्ये निरता मदनरसलावण्यनिरता । तां मदनरसलावण्यनिरतां । नक्तं रात्रौ । सम्यगासक्तः समासक्तः । रतस्य आनंदः रतानंदः । रतानंदे निरतो रतानंदनिरतः । हरतीति हरः स्मरस्य हरः स्मरहरः । किलेति सत्यम् ॥ १८ ॥

सा० हे अंब, (त्रिकोणं त्रिकोणं नवकोणं पद्ममिति कालिकाश्रुतेः—आदौ त्रिकोणं विन्यस्य त्रिकोणं तद्बहिर्न्यसेत् । ततो वै विलिखेन्मंत्री त्रिकोणत्रयमुत्तमम् । ततो वृत्तं समालिख्य लिखेदष्टदलं ततः । वृत्तं विलिख्य विधिवल्लिखेद्भूपुरमेककमितिकालीतंत्रोक्तेः

मध्ये तु बैंदवं चक्रं बीजं माया विभूषितमिति कुमारीकल्पवचनात् । पंचशक्तिं समालिख्य अधोवक्त्रीं सुलक्षणामिति नीलतंत्रोक्तेश्च) एवंविधोक्ते पंचदशारे पीठे शवरूपमहेश्वरवक्षसि महाकालेन सहोच्चकैः सुरतक्रीडासौंदर्यासक्तां भक्तः स्वयमपि रात्रावत्यासक्तो रतिरसानंदतत्परः सन् त्वां चिंतयेत् स भक्तः (जीवः शिवः शिवो जीवः स जीवः केवलः शिवः ॥ पाशबद्धस्तथा जीवः पाशमुक्तः सदाशिवः ॥ इति स्कंदोपनिषदुक्तेः) पाशाष्टकपरिच्छेदनेन मारहरः स्यात् किलेति प्राह ॥ १८ ॥

सलोमास्थि स्वैरं पललमपि मार्जारमपि ते
परं त्वौष्ट्रं मैषं नरमहिषयोश्छागमपि वा ।
बलिं ते पूजायामपि वितरतां मर्त्यवसतां
सतां सिद्धिः सर्वा प्रतिपदमपूर्वा प्रभवति ॥ १९ ॥

हे असिते, स्वैरं मार्जारं परं तु औष्ट्रं मैषं नरमहिषयोः छागमपि सलोमास्थि वा पललमपि ते पूजायामपि बलिं वितरतां मर्त्यवसतां सतां अपूर्वा सर्वा सिद्धिः प्रतिपदं प्रभवति । स्वैरं सुखेन । लोमानि च अस्थीनि च लोमास्थीनि । लोमास्थिभिः सह वर्तमानं सलोमास्थि वा पललमपि मांसमपि । वितरतां ददतां । मर्त्ये वसंति ते मर्त्यवसंतः तेषां मर्त्यवसतां । सतां साधूनां । नास्ति पूर्वे यस्याः सा अपूर्वा । सर्वा समग्रा । पदं पदं प्रतीति प्रतिपदं । प्रभवति प्रकटीभवति ॥ १९ ॥

सा० हे कालि, सकचकुल्यं बैडालं च क्रामेलकं छागं नृलुलाययोराजं वा मांसं तव पूजासमये ये साधकाः बलिं समर्पयंति तेषां मृत्युलोकनिवासिनां साधकानां प्रतिक्षणं समस्तसिद्धिनिकरो नवनवः प्रादुर्भवति ॥ (अत्र तंत्रोक्तानि बलिदानप्रतिपादकानि वच-

नानि क्षत्रियविषयाणि ॥ ब्राह्मणस्य साक्षात्पशुबलिदानं नास्ति । किंतु ब्राह्मणस्य बलिर्यत्र तत्रायं विहितः क्रमः ॥ कृत्वा घृतमयं सिंहं नरं व्याघ्रं च भैरव ॥ अथवा पूपविकृतं यवक्षोदमयं च वा ॥ घातयेच्चंद्रहासेन तेन मंत्रेण संस्कृतम् ॥ अवश्यविहितं यत्र मद्यं तत्र द्विजः पुनः ॥ नारिकेलजलं कांस्ये ताम्रे वा विसृजेन्मधु ॥ नापद्यपि द्विजो मद्यं कदाचिद्विसृजेदपीति कालिकापुराणवचनात् ॥ पायसं तु गजत्वेन मार्जारत्वे कुलुत्थकम् ॥ वृंताकं कुक्कुटत्वेन मेषत्वेन च तुंबिकाम् ॥ माहिषत्वे मसूरान्नमुष्ट्रत्वे न च तुंबिकामिति बृहत्तंत्रराजोक्तेः । वामदक्षिणमार्गो हि कालीताराविधौ स्मृतः ॥ द्राविडो दक्षिणः प्रोक्तो गौडो वामः प्रकीर्तितः । इति शक्तिसंगमतंत्रवचनप्रामाण्यात् बलिदाने वामदक्षिणमार्गव्यवस्थाऽवलोकनीयेति कथयति ॥ १९ ॥

वशी लक्षं मंत्रं प्रजपति हविष्याशनरतो
दिवा मातर्युष्मच्चरणकमलध्याननिरतः ।
परं नक्तं नग्नो निधुवनविनोदेन च मनुं
जपेल्लक्षं स स्यात्स्मरहरसमानः क्षितितले ॥ २० ॥

हे मातः, हविष्याशनरतः युष्मच्चरणकमलध्याननिरतः वशी यः दिवा लक्षं मंत्रं प्रजपति । परं नक्तं नग्नः सन् निधुवनविनोदेन लक्षं मनुं जपेत् स क्षितितले स्मरहरसमानः स्यात् । हविष्यस्य अशनं हविष्याशनं । हविष्याशने रतः हविष्याशनरतः ॥ युष्माकं चरणकमलं युष्मच्चरणकमलं । युष्मच्चरणकमलस्य ध्यानं युष्मच्चरणकमलध्यानं । युष्मच्चरणकमलध्याने निरतो युष्मच्चरणकमलध्याननिरतः । सर्वाणींद्रियाणि वशेऽस्य संतीति वशी । परमन्यच्च ।

नक्तं रात्रौ । निधुवनस्य विनोदः निधुवनविनोदः । तेन निधुवनविनोदेन । निधुवनं क्रीडा । क्षित्याः तलं क्षितितलं । तस्मिन् क्षितितले । हरतीति हरः । स्मरस्य हरः स्मरहरः । स्मरहरेण समानः स्मरहरसमानः ।। २० ।।

सा० हे मातः, हविष्यान्नभक्षणपरो नियतेंद्रियो भक्तस्तव पादपंकजचिंतनपरः सन् दिवसे लक्षसंख्याकं मूलमंत्रं जपति । च पुनः रात्रौ नग्नः सन् सुरतक्रीडया लक्षसंख्यापरिमितं मंत्रं द्रुतविलंबादिदोषराहित्येन यो जपेत् स पृथिव्यां शिवतुल्यैश्वर्यो भवेत् (भोगः स्वकीयकांताभिर्दक्षिणाचार इत्ययमिति दक्षिणाचारतंत्रराजवचनात्) भोगव्यवस्थां रात्रिंदिवभेदेन द्विविधं पुरश्चरणं च दर्शयति ।। २० ।।

इदं स्तोत्रं मातस्तव मनुसमुद्धारणजनुः-
स्वरूपाख्यं पादांबुजयुगलपूजाविधियुतम् ।
निशार्धं वा पूजासमयमथवा यस्तु पठति
प्रलापस्तस्यापि प्रसरति कवित्वामृतरसः ।। २१ ।।

हे मातः, तव मनुसमुद्धारणजनुः पादांबुजयुगलपूजाविधियुतं स्वरूपाख्यं इदं स्तोत्रं यः निशार्धं अथवा पूजासमयं वोद्दिश्य पठति तस्य प्रलापोऽपि कवित्वामृतरसः प्रसरति । मनोः समुद्धारणं मनुसमुद्धारणं मनुसमुद्धारणस्य जनुर्यस्मात्तत् मनुसमुद्धारणजनुः । पादावेव अंबुजं पादांबुजं पादांबुजस्य युगलं पादांबुजयुगलं । पादांबुजयुगलस्य पूजा पादांबुजयुगलपूजा । पादांबुजयुगलपूजायाः विधिः पादांबुजयुगलपूजाविधिः । पादांबुजयुगलपूजाविधिना युतं पादांबुजयुगलपूजाविधियुतं । स्वरूपमिति आख्या यस्य तत्स्वरूपा-

ख्यं ॥ निशायाः अर्धं निशार्धं । पूजायाः समयः पूजासमयः तं । पूजासमयं । प्रलापोऽपि भाषणमपि । कवित्वमेवामृतं कवित्वामृतं कवित्वामृतस्य रसः कवित्वामृतरसः । प्रसरति व्याप्नोति ॥ २१ ॥

सा० हे मातः, त्वदीयद्वाविंशत्यक्षरात्मकमूलमंत्रप्रादुर्भावं पादकमलयुगलनमस्यासहितं (अत्र पूजाशब्देन ध्यानं लक्ष्यते । पूजायाः कुत्राप्यनुक्तत्वादस्मिन्स्तोत्रे) स्वरूपाख्यमिदं स्तोत्रं निशीथकालेऽथवा पूजासमये यः पठति तस्याननुसंधानेन यत्किंचिद्भाषणमपि कवित्वपीयूषसरिद्रूपेणैव प्रसरतीति स्तोत्रपाठफलमाह ॥ २१ ॥

कुरंगाक्षीवृंदं तमनुसरति प्रेमतरलं
वशस्तस्य क्षोणीपतिरपि कुबेरप्रतिनिधिः ।
रिपुः कारागारं कलयति च तत्केलिकलया
चिरं जीवन्मुक्तः स भवति सुभक्तः प्रतिजनु ॥२२॥

इति श्रीमहाकालविरचितः कर्पूरस्तवराजः संपूर्णः ॥

प्रेमतरलं कुरंगाक्षीवृंदं तमनुस्मरति । कुबेरप्रतिनिधिः क्षोणीपतिरपि तस्य वशः भवति । तत्केलिकलया रिपुः कारागारं कलयति । सुभक्तः स प्रतिजनुः चिरंजीवन्मुक्तो भवति । प्रेम्णा तरलं प्रेमतरलं । तरलं चपलम् । कुरंगस्याक्षिणीवाक्षिणी यासां ताः कुरंगाक्ष्यः । कुरंगाक्षीणां वृंदं कुरंगाक्षीवृंदं । तं पुरुषं । कुबेरः प्रतिनिधिर्यस्य स कुबेरप्रतिनिधिः । क्षोण्याः पतिः क्षोणीपतिरपि । वशः अधीनो भवति । केल्याः कला केलिकला तस्य केलिकला तत्केलिकला तया तत्केलिकलया । कला अंशः । कारागारं बंदिगृहं कलयति अनुभवति । सुष्ठु भक्तः सुभक्तः । जनुर्जनुः प्रतीति प्रतिजनु । चिरं बहुकालं । जीवन्मुक्तो जीवन्सन्नपि मुक्तो भवति ॥ २२ ॥

इति समासबोधिनी समाप्ता ॥

सा० प्रेमचपलं सुंदरीयूथं तं साधकमनुसरति च कुबेरतुल्यः सकलसर्वसहानायकस्तस्याज्ञाकारी भवति। तस्य क्रीडालेशेनाहितोऽपि बंदिगृहं सेवते । (बहूनां जन्मनामंते ज्ञानवान्मां प्रपद्यते) इति स्मृतेः स साधकः प्रतिजन्म चिरं जीवन्सन् देवताप्रसादाधिगतपरमार्थज्ञानेन मुक्तपाशाष्टकतया मुक्तो भवति ॥ (कलौ काली महाविद्या कलौ काली तु सिद्धिदा ॥ कलौ काली सुसिद्धा च कलौ काली वरप्रदा ॥ कलौ कालीं विहायाथ यः कश्चित् सिद्धिकामुकः ॥ स तु शक्तिं विना देवि रतिसंभोगमिच्छति ॥ इति महाकालसंहितावचनात् ॥ युगादिसमये देवि शिवं परगुणोत्तरं ॥ तदिच्छानिर्गुणं शांतं सच्चिदानंदविग्रहम् ॥ शाश्वतं सुंदरं शुभ्रं सर्वदेवयुतं वरम् ॥ आदिनाथं गुणातीतं काल्या संयुतमीश्वरम् ॥ विपरीतरतं देवं सामरस्यपरायणमित्यादि ॥ ब्राह्मणेन तथा कार्यं ब्राह्मण्यं न विनश्यति ॥ ब्राह्मणो मदिरां दृष्ट्वा ब्राह्मण्यादेव हीयते ॥ प्राणात्ययं प्रयच्छंतु ब्राह्मणो नार्चयेत्सुरामिति शक्तिसंगमतंत्रोक्तेः ॥ यो दाक्षिण्यं विना विप्रो महाकालीं प्रपूजयेत् । स पापी स्वर्गलोकात्तु च्युतो भवति रोगधृक् ॥ विप्रो यः पूजको वामः सोऽन्यायी पुण्यवर्जित इति कालीपुराणात् ॥ स्वपन् तिष्ठन् व्रजन्मार्गे प्रलपन्भोजने रतः ॥ कीर्तयेत्सततं देवीं स वै मुच्येत बंधनादिति पद्मपुराणात्) सामान्येन देवीनामकीर्तनाद्बंधकत्वमुक्तिः किमु साधकतयेति फलश्रुतिं प्राह ॥ २२ ॥ इतिसारबोधिनी समाप्ता ॥

चंद्रबाणाष्टभूसंख्ये शालिवाहनवत्सरे ।
माधवस्य सिते पक्षे पूर्णिमायां गुरोर्दिने ॥ १ ॥
कर्पूरस्तवराजीयव्याख्यानयुगलं मुदा ।
त्वदीयचरणांभोजे जगदंब ! समर्पये ॥ २ ॥

ताराकर्पूरस्तोत्रम् ।

ॐ नमस्तारिण्यै ।

श्रीकण्ठामृतकेशवर्णघटितं चंद्रार्धचूडोज्ज्वलं
बीजं यत्परमं गुणत्रयमयं कामप्रदं मुक्तिदम् ।
मातः ! शंकरवल्लभे ! प्रतिदिनं ध्यायंति ये ये सदा
ते ते यान्ति चिदात्मकं हरिहरब्रह्मादिसाम्यं मुदा ॥१॥
व्योमार्णं वामनेत्रान्वितमनलयुतं बिंदुचन्द्रार्धयुक्तं
बीजं ते गुह्यमेतत्रिभुवनजननि ! त्रिक्षणे[1] ये जपंति ।
तेषां वक्त्रारविंदे विहरति मधुरा गद्यपद्यावली गी-
र्मातश्चंद्रार्धचूडे ! सकलभयहरे ! सिद्धिभाजां नराणाम् २
शुक्रार्णं पूतनास्थं कलितशशिकलाबिंदुभूषं सवह्नि
भ्राजद्वामाक्षियुक्तं जननि ! तव वधूबीजमेतज्जपंति ।
ते ते लोलेक्षणानां विगलितरसनापीनवक्षोजवासः
केशानां चित्तमाशु स्मरहरमहिले ! मोहयंति प्रकामम् ३
ईशानं वामकर्णोल्लसितशशिकला बिंदुयुक्तं सुगुह्यं
"बीजं मातस्त्वदीयं"[2] यदि जपति जनो वारमेकं जडात्मा ।
चंचत्पञ्चाशदुग्रग्रथितनरशिरोमालिकाक्रांतकण्ठे !
मातः शैलेंद्रपुत्रि ! त्रिभुवनमपि स क्षोभयत्येव शीघ्रम् ४
पश्चादस्त्रं तदन्यत्पुरहरमहिले ! बीजमत्यंतगुह्यं

---

१ त्र्यक्षरं-पाठः । २ "बीजं कूर्चाख्यमन्यद्" ।

भालोद्यत्पंचमुद्रे प्रकटविकटदंष्ट्रोग्रवक्त्रारविंदे ।
नित्यं ये भावयंति प्रतिदिनममले! घोररूपाट्टहासे!
ते नूनं भावयंति त्रिजगदघहरे! चक्रवद्विश्वमेतत् ॥५॥
मायास्त्रीकूर्चबीजैर्नवतपनहरित्सार्धचंद्रांशुवर्णे
मातर्नीलाख्यमेतत्तव मनुमनिशं ये प्रकामं जपंति ।
वित्ते वित्तेशतुल्याः शुकगुरुसदृशास्तर्ककाव्यागमादौ
ते ते नीलांबुदालीरुचिरुचिरतनो! कामतुल्या भवंति ६
भवान्येभिर्बीजैर्हिमगिरिसुते! चास्त्रसहितै-
र्निगूढं ये मातर्मनुमनुजपंत्येकजटिले!।
त्रियामानाथार्धप्रविलसितभाले! त्रिनयने!
गृहे तेषां नित्यं निवसति सदा सिंधुतनया ॥ ७ ॥
अमीभिर्बीजैस्ते प्रणवसहितैः शैलतनये!
निजस्वांते चास्त्रं परिजपति "पंचाक्षर"मिति ।
स साक्षात्ते न्यासी स तु पुरहरोऽसौ मुरहरः
स धाता यं मुक्तो भवति हि चिदानंदरसिके! ॥ ८ ॥
शवासीनां कंठाकलितनृकरोटीं करलसत्
कपालासिश्यामोत्पलरुचिरकर्त्रीं त्रिनयनाम् ।
नवांभोदश्यामान्विकटरदभीमान्पृथुकुचाम्
सदैव त्वां ध्यायन् जननि! च जडो वाक्पतिसमः ॥९॥
तटे नद्याः सिंधोर्गिरिशिरसि मालूरगहने
श्मशाने गोष्ठे वा गिरिशभवने शून्यसदने ।

---

१ ॐ ह्रीं स्त्रीं हूं फट् ॥ पंचाक्षरम् ।

हविष्याशी लक्षं प्रजपति वशी भावनपरः
स सर्वज्ञो वाग्मी भवति सुघनापीनजघने! ॥ १० ॥
मुदा मातः शुद्धोदकरुचिरगंधाढ्यसलिलैः
स्वयंभूपुष्पस्त्रकुलतनुभग "च्छालन"[1] जलैः ।
शिवे! त्वां संध्यायन् हरमहिषि! संतर्पयति यः
स दैवस्त्रीवृंदं वशयति स विद्याधरपतिः ॥ ११ ॥
जपापुष्पैर्बिल्वैर्मरुबकुलवर्गैश्च कुसुमैः
सुगंधैः कर्पूरैरगरुसहितैर्धूपनिकरैः ।
प्रदीपैरुज्ज्वालैर्घृतरचितनैवेद्यनिकरै-
स्त्वार्चां यः कुर्यात्स भवति कवीन्द्रः क्षितितले ॥१२॥
सदूर्वाभिः पद्मैस्त्रिमधुललितैः श्रीफलदलै-
र्घृतैर्गव्यै रक्तैः सुकुलभगलिंगामृतरसैः ।
त्रिकोणे कुंडे यो हुतवहमुखे होमविधिना
जुहोति त्वां मातः! स भवति कवींद्रः क्षितिपतिः ॥१३॥
निशीथे कल्याणि! प्रमुदितमना यः पितृवने
बलिं ते मेषाद्यैः सनरमहिषैर्वा परिचरेत् ।
स राजानं क्षिप्रं वशयति मृगाक्षीसमुदयं
त्रिलोकीं वा भूमौ स भवति जनः सत्कविवरः ॥ १४ ॥
महापूजां मातस्तव वितनुते यस्तु मधुना
तथा मांसैर्मत्स्यैर्विविधनवमुद्रादिभिरपि ।
वरस्त्रीभिः सार्धं निधुवनविनोदेन मुदितो
निशीथे संसारात्स भवति विमुक्तः पशुभयात् ॥ १५ ॥

---

१ क्षालनं ।

त्रिकोणे पीठे त्वां वरनिधुवनासङ्गहृदयां
महाकालेनोद्यत्पुलकनिचयां स्मेरवदनाम् ।
स्वयं नक्तं कान्तारतिरससमासक्तहृदयो
मनुष्यो यो ध्यायेद्भवति शिवतुल्यः स धरणौ ॥ १६ ॥

समुत्तुंगापीनस्तनजघनराजत्कुलवधू-
व्यवायव्यासक्तो जपति तव भक्तो यदि मनुम् ।
गलद्वासःकेशो जननि ! मनुजो मेदिनितले
स सिद्धीशः शक्त्या जयति सुचिरं सर्वसुजनम् ॥ १७ ॥

भवानि ! श्रीमातर्निजगलितवीर्याप्तचिकुर-
मथ प्रेम्णा लब्ध्वा वचनभुवनेशीयुतमनुम् ।
समुच्चार्य क्षोणीतनयदिवसे प्रेतसदने
स दीर्घायुर्वाग्मी भवति शतहोमात्क्षितितले ॥ १८ ॥

अजस्रं यो मंत्रं तव जपति भूमीधरसुते
विचिंत्याग्रे मातः ! कुसुमललितं मारभवनम् ।
धरण्यां कंदर्पप्रतिमतनुभूतः स सकला-
न्निजेष्टानाप्नोति प्रविशति मुदा तारिणिपदम् ॥ १९ ॥

तमोग्रस्ते चंद्रे यदि जपति लोकस्तव मनुं
नवम्यां वा मातर्धरणिधरकन्ये ! वितनुते ।
तथा सूर्ये पृथ्वीवलयतिलकः काव्यतटिनी
पयोधिः सिद्धीनां भवति भवनं सर्वविदितः ॥ २० ॥

सदा पादांभोजे भजतु हृदयं भृंग इव मे
सदा पाणिद्वंद्वं परिचरतु कर्णस्तव कथाम् ।

शृणोतु त्वकीर्तिं हरमहिषि ! गीर्गायतु सदा
सदा दृष्टिर्भूयाद्भवदनुचरालोकनपरा ॥ २१ ॥
कदाकाले शैलेश्वरतनुभवे ! पादयुगलं
मुदा द्रक्ष्ये ब्रह्मप्रमुखविबुधानां परिणुतम् ।
कृपापारावारे ! भवजननभीतैकशरणे !
शरण्ये ! कारुण्यं मयि वितर दीने भगवति ! ॥ २२ ॥
सदैव स्तोत्रं यः पठति मुदितः साधकवरो
न दारिद्र्यं तस्य प्रभवति कदाचित्क्षितितले ।
त्रिवर्गो हस्ते स्याज्जगदखिलमेतच्च वशगं
चिरं जीवन्नंते जननि ! लभते मोक्षपदवीम् ॥ २३ ॥
इदं स्तोत्रं मातः प्रपठति दिवारात्रिमनिशं
स सर्वज्ञो योगीश्वरनिकरचूडामणिसमे ! ।
जडोऽपि त्वद्रूपं जपति यदि संचित्य मनसा
त्वदग्रे भूयोच्चैः क्षितिपतिसमानः क्षितितले ॥ २४ ॥
महापुण्यं धन्यं सकलपुरुषार्थैकनिलयं
यशस्यं चायुष्यं सततभवतापापहमिदम् ।
रहस्यं प्राकाश्यन्न हि खलु कदाचित्पशुजने
पठेत्पूजाकाले जननि ! लभते मोक्षपदवीम् ॥ २५ ॥

॥ इति श्रीफेत्कारीतंत्रे ताराकर्पूरस्तोत्रम् ॥

